## वृणोतेराच्छादने। (५४/३२२९)

विभाषा प्र इति वर्तते। प्रशब्दे उपपदे वृणोतेः धातोः विभाषा घञ् प्रत्ययो भवति, प्रत्ययान्तेन चेदाच्छादनविशेष उच्यते। प्रावारः, प्रवरः। आच्छादने इति किम्? [1]प्रवरा गौः॥

## परौ भुवोऽवज्ञाने। (५५/३२३०)

विभाषा इत्येव। परिशब्दे उपपदे भवतेः [2]धातोः विभाषा घञ् प्रत्ययो भवति अवज्ञाने गम्यमाने। अवज्ञानम् असत्कारः। परिभावः, परिभवः। अवज्ञाने इति किम्? सर्वतः भवनं परिभवः॥

## एरच्। (५६/३२३१)

भावे, अकर्तरि च कारके इति [3]प्रकृतमनुवर्तते यावत् 'कृत्यल्युटो बहुलम्' (३.३.११३/२८४१) इति। इवर्णान्ताद् धातोः भावे (३.३.१८/३१८४), अकर्तरि च कारके सञ्ज्ञायाम् (३.३.१९/३१८८) [4]अच् प्रत्ययो भवति। घञोऽपवादः। चकारो विशेषणार्थः, [5]'अन्तः' (६.२.१४३/३८७७) 'थाऽथघञ्क्ताजबित्रकाणाम्' (६.२.१४४/३८७८) इति। चयः। [6]अयः। जयः। क्षयः।

[३०३] अज्विधौ [7]भयादीनामुपसङ्ख्यानम्। (म. भा. २.१४९)

नपुंसके क्तादिनिवृत्त्यर्थम्। भयम्। वर्षम्।

[३०४] जवसवौ छन्दसि वक्तव्यौ। (म. भा. २.१५०)

'ऊर्वोरस्तु मे जवः' (पै. २०.३६.७)। '(अयं) पञ्चौदनः [8]सवः' (पै. ८.१९.३)॥

## ॠदोरप्। (५७/३२३२)

ॠकारान्तेभ्यः उवर्णान्तेभ्यः च [9]अप् प्रत्ययो भवति। घञोऽपवादः। पित्करणं स्वरार्थम्। [10]करः गरः। शरः। उवर्णान्तेभ्यः – [11]यवः। लवः। [12]पवः। दकारो मुखसुखार्थः। मा भूत्तादपि परः तपरः[13]॥

---

1. प्रवरो अ. ब. 2. धातोः नास्ति फ. 3. प्रकृतम् नास्ति 4. विषये इत्यधिकम् ह. 5. अन्तः नास्ति ब. ड. 6. अयः नास्ति अ. ड. फ. 7. भायादीनाम् फ. 8. देवस्य सवितुः सवे अ. 9. धातुभ्यः इत्यधिकम् ग. ड. फ. ह. 10. ॠवर्णान्तेभ्यः इत्यधिकम् ग, कॄ, गॄ, शॄ इत्यधिकम् ब. 11. युङ् युञ् वा यवः ब. 12. पूञ् सवः ब, पवः नास्ति ड, स्तवः इत्यधिकम् फ. 13. इति इत्यधिकम् क.